"चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ।
जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम् ॥"
इति भाषापरिच्छेदः ॥
उत्तरपदस्थरूपादिशब्दस्य उपमानवाचकत्वम् । यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ।
भूतरूपोपमाः काशः सन्निभः प्रथितः परः ॥"
इति हेमचन्द्रः ॥
अतिशयरूपस्य दोषो यथा,—
उमोवाच ।
"रूपातिशयसम्पन्ना नानागुणसमन्विताः ।
किमर्थं दुःखिता जाताः कान्तसौख्यविवर्ज्जिताः॥
ईश्वर उवाच ।
दमयन्ती तथा सीता रूपातिशयपारगा ।
दुःखिता तेन संजाता कान्तसौख्यविवर्ज्जिता ॥
अहल्या बन्धकी जाता कपिलस्य तु योषिता ।
रूपस्य तु प्रभावेण दासी जाता तिलोत्तमा ॥
तस्माद्रूपञ्च नेच्छन्ति तत्त्वज्ञास्तपोधनाः ।
अतिरूपेण स्वल्पायुः पुरुषो योषितोऽपि वा ।
अथवा सौख्यहीनस्तु जायते तु महातपे ॥"
इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥
तद्वैदिकपर्य्यायः । निर्णिक् १ वव्रिः २ वर्पः ३ वपुः ४ अमतिः ५ अप्सः ६ प्सुः ७ अप्नः ८ पिष्टम् ९ पेशः १० कृशनम् ११ भरः १२ अर्ज्जुनम् १३ ताम्रम् १४ अरुषम् १५ शिल्पम् १६ । इति षोड़शरूपनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥
रूपकं, क्ली, ( रूपयतीति । रूपि + ण्वुल् । ) नाटकम् । ("तस्य रूपकसंज्ञाहेतुमाह । रूपारोपात्तु रूपकम् । रूपकस्य भेदानाह ।
नाटकमथ प्रकरणं
भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः
प्रहसनमिति रूपकाणि दश ॥
किञ्च ।
नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम् ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥)
मूर्त्तम् । (यथा, कथासरित्सागरे । ५५ । ४३ ।
"व्यादिश्यताञ्च चित्रे किमालिखामीह रूपकम् ॥")
काव्यालङ्करणम् । इति मेदिनी । के, १४८ ॥
शेषस्य लक्षणं यथा,—
"रूपकं रूपितारोपात् विषये निरपह्नवे ।
तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥
यत्र कस्यचिदारोपः परारोपणकारणम् ।
तत् परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम् ।
प्रत्येकं केवलं मालारूपञ्चेति चतुर्व्विधम् ।
अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ॥
समस्तवस्तुविषयमेकदेशविवर्त्ति च ।
आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम् ॥
यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत् ।
निरङ्गं केवलस्यैव रूपणं तदपि द्विधा ॥
माला केवलरूपत्वात् तेनाष्टौ रूपके भिदाः ॥"
इति साहित्यदर्पणे १० परिच्छेदः ॥
अपि च ।
"अभेदो भासते यस्मिन्नुपमानोपमेययोः ।
रूपकं कथ्यते सद्भिरलङ्कारोत्तमं यथा ॥
तन्वि शुभ्रस्खलाभोगं लीलालकमधुव्रतम् ।
न कस्य हरते चेतो त्वद्वदनकेशरम् ॥
अस्त्यनेकप्रकारत्वं रूपकोपमयोरपि ।
संक्षेपेणोक्तमन्यत्तु सुधीभिरवधीयताम् ॥"
इति काव्यचन्द्रिका ॥
संख्याविशेषः । यथा,—
"सप्तालौ शोच्यते गुञ्जा सा तिस्रो रूपकं भवेत् ।
रूपकैर्द्दशभिः प्रोक्तः कलञ्जो नाम नामतः ॥"
इति युक्तिकल्पतरुः ॥
(उपमानम् । यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे ।
"यत्र तु रूप्यरूपकयोः साम्यमस्फुटमिति ॥"
पुं, मुद्रा । यथा, कथासरित्सागरे । ७८।१३ ।
"अल्पे परिकरेऽप्येभिरियद्भिः स्वर्णरूपकैः ।
किमेष व्यसनं पुण्यात्यय कश्चन सह्यायम् ॥"
तथाच बृहत्संहितायाम् । ८१ । १२ ।
"गुञ्जात्रयस्य मूल्यं पञ्चाशद्रूपका गुणयुतस्य ॥")
रूपतत्त्वं, क्ली, ( रूपस्य तत्त्वम् । ) शीलम् । यथा,—
"स्याद्रूपं लक्षणं भावश्चात्मप्रकृतिरीतयः ।
सहजो रूपतत्त्वञ्च धर्म्मसर्गौ निसर्गवत् ॥"
इति हेमचन्द्रः । ६ । १२ ॥
रूपधारी, [ न् ] ( रूपं धरतीति । धृ + णिनिः । ) सौन्दर्य्यविशिष्टः । यथा,—
"ततो विकटरूपोऽसौ सर्व्वशास्त्रार्थपारगः ।
विवाहयद्द्विजसुतां रूपेणानुपमां द्विजः ॥
सावमेने च भर्त्तारं सुशीलमपि भाविनी ।
विरूपमिति मन्वाना ततः सोऽभूत् सुदुःखितः ॥
ततो निर्व्वेदसंयुक्तो गत्वाश्रमपदं महत् ।
इरावत्यास्तटे श्रीमान् रूपधारिणमासदत् ॥
तमाराध्य जगन्नाथं नक्षत्रपुरुषेण हि ।
सुरूपतामवाप्याग्र्यां तस्मिन्नेव च जन्मनि ॥"
इति वामनपुराणे ७६ अध्यायः ॥
रूपनाशनः, पुं, ( रूपस्य नाशनं अदर्शनं यत्र । ) पेचकः । इति शब्दरत्नावली ॥
रूपवान्, [ त् ] त्रि, ( रूपमस्यास्तीति । रूप + "रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वः । ) आकारविशिष्टः । ( यथा, भागवते । २ । ५ । २७ ।
"वायोरपि विकुर्व्वाणात् कालकर्म्मस्वभावतः ।
उदपद्यत वै तेजो रूपवत् स्पर्शशब्दवत् ॥" )
सौन्दर्य्ययुक्तः । ( यथा, महाभारते । ३ । ४५ । १२ ।
"सत्यवाक् पूजितो वक्ता रूपवाननहङ्कृतः ॥")
रूपाजीवा, स्त्री, ( रूपेण सौन्दर्य्येण आजीवतीति । आ + जीव् + अच् । टाप् । ) वेश्या । इत्यमरः । २ । ६ । १९ ॥ ( यथा, रामायणे । २ । ३६ । ३ ।
"रूपाजीवाश्च वादिन्यो वणिजश्च महाधनाः ।
शोभयन्तु कुमारस्य वाहिनीः सुप्रसारिताः ॥")
रूपास्त्रः, पुं, ( रूपमेव अस्त्रं यस्य । ) कामदेवः । इति त्रिकाण्डशेषः ॥
रूपिका, स्त्री, (रूपमस्या अस्तीति । रूप + ठन् ।) श्वेतार्कवृक्षः । इति रत्नमाला ॥ ( यथा, सुश्रुते । ५ । ६ ।
"पललं तिलतैलञ्च रूपिकायाः पयो गुड़ः ॥")
रूपेश्वरी, स्त्री, ( रूपाणामीश्वरी ।) देवीविशेषः । सा तु प्रभवादिषष्टिवर्षान्तर्गतैकविंशवर्षे पूज्या । यथा,—
"रूपेश्वरी प्रकर्त्तव्या वृषयुग्मव्यवस्थिता ।
जटामुकुटभारेन्दुत्रिशूलोरगभूषणा ॥
मणिमौक्तिकशोभाढ्या सितचन्दनचर्च्चिता ।
पूजिता कुसुमैर्हृद्यैः सर्व्वकामफलप्रदा ॥"
इति देवीपुराणे संवत्सरदेवताविंशतिविधिः प्रथमः ॥
रूप्यं, क्ली, ( आहतं रूपं अस्यास्तीति । रूप + "रूपादाहतप्रशंसयोर्यप् ।" ५।२।१२० । इति यप् । ) आहतस्वर्णरजतम् । इत्यमरः ।२।९। ९१ ॥ हेम रूप्यञ्च आहतं अश्ववराहपुरुषादिरूपमुत्थापयितुं निर्घातिकया ताड़ितं रूप्यमुच्यते रूपाय आहतं रूप्यं ट्यै कादिति ण्यः । इति भरतः ॥ * ॥ धातुविशेषः । रूपा इति भाषा ॥ ( यथा, महाभारते । ५ । ३९ । ७९ ।
"सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु ।
ज्ञेयं त्रपु मलं सीसं सीसस्यापि मलं मलम् ॥")
तत्पर्य्यायः । शुभ्रम् २ वसुश्रेष्ठम् ३ रुधिरम् ४ चन्द्रलोहकम् ५ श्वेतकम् ६ महाशुभ्रम् ७ रजतम् ८ तप्तरूपकम् ९ चन्द्रभूति १० सितम् ११ तारम् १२ कलधूतम् १३ इन्द्रलोहकम् १४ रौप्यम् १५ धौतम् १६ सौधम् १७ चन्द्रहासम् १८ । इति राजनिर्घण्टः ॥ खर्ज्जूरम् १९ दुर्व्वर्णम् २० श्वेतम् २१ रङ्गबीजम् २२ राजरङ्गम् २३ लोहराजकम् २४ । इति शब्दरत्नावली ॥ कलधौतम् २५ । इति जटाधरः ॥ अस्य गुणाः । स्निग्धत्वम् । कषायत्वम् । अम्लत्वम् । विपाके मधुरत्वम् । सरत्वम् । वातपित्तहरत्वम् । रुच्यत्वम् । वलीपलितनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अथ रूप्यस्योत्पत्तिनामलक्षणगुणाः ।
"त्रिपुरस्य वधार्थाय निर्निमेषैर्व्विलोकनैः ।
निरीक्षयामास शिवः क्रोधेन परिपूरितः ॥
ततस्तूल्का समपतत्तस्यैकस्मादिलोकवात् ।